# वैशेषिकदर्शने पदार्थविज्ञानम्

**Hareram Tripathi**

Shri Lal Bahadur Shastri Rastriya Sanskrit Vidyapitham, New Delhi-16

### *Abstract*

*The method of intervention of matters is known as Darshan Shastra. The feeling of Physical objects is possible through sense organs, but old Darshan makes this internally.*

*The main goal of Indian Darshan is to understand objects physically as well as internally. In Indian Philosophy Vaisheshika Darshan presents the matters physically and internally. For this Darshan is responsible. Today western scientists talk about gravitation, atoms, nucleus but in Viasheshika Sutra these facts are interpreted 3000 years B.C. by Vaisheshika philosophers e.g. "Gurutvat patnam" this mantra from Kanada rishi means Earth has gravitational character, it we throw an object in air and if that object has gravitational character, then due to gravitation of earth then the object will fall and if it does not have gravitational character then it will not fall e.g. "ballon". Many like above scientific facts have been given in Vaisheshika Sutra which will be presented in this paper. Also spiritual and scientific explantation will be represented in research paper. Vaisheshika Darshan considers nine types of matter. They are earth, water, Radiation (Tej, energy) and air are considered as 'nitya' and 'anitya'. Parmanu is undivisible and conventional. According to Vaisheshika the division of paramanu is not possible. Paramanu is a matter which has no parts. The paramanu which is said to be divided by scientist, according to Vaisheshika it is "Trasranu".*

वैशेषिकदर्शनं भारतीयदर्शनेष्वन्यतमं दर्शनं विद्यते। अस्य दर्शनस्य प्रवर्तकः महर्षिः कणादो वर्तते। कणादप्रणीतवैशेषिकसूत्रे द्रव्यगुणकर्मसामान्यविशेषसमवायपदार्थानां हेतुत्वं मोक्षे[१] प्रतिपादित-मस्ति। अतः तेषां नये द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट्पदार्थाः सन्ति। यद्यपि "क्रियागुणव्यपदेशाभावात् प्रागसत्"[२] "सदसत्"[३] "सच्चासत्"[४] "यच्चान्यदसदतस्तदसत्"[५] इत्यनेन अभावस्यापि विवेचनं तत्रैवोपलभ्यते। तथापि उद्देश्यपुरःसरं षड्भावपदार्थानां विवरणं दरीदृश्यते। प्रशस्तपादप्रभृतिव्याख्याकाराः कणादमन्तव्यस्य एवानुसरणं कृतवन्तः। दशमशताब्द्यां शिवादित्यः अभावपदार्थमपि स्वीकृतवान्। तत्र केचन दार्शनिकाः वदन्ति यत् कणादः "द्रव्यगुणकर्माणि" पदार्थाः सन्तीति आरम्भे स्वीकृतवान्। कालक्रमेण केचन तस्य अनुयायिनः त्रयाणां पदार्थानामतिरिक्तत्वस्वरूपान् सामान्यविशेषसमवायपदार्थान् स्वीकृत्य तान् पदार्थान् मूले योजितवन्त इति। यतोहि वैशेषिकसूत्रस्य प्रथमाध्यायस्य प्रथमाह्निके द्रव्यगुणकर्मणामेव साधर्म्यं वैधर्म्यञ्चोपलभ्यते। अष्टमाध्यायस्य द्वितीयाह्निके पदार्थशब्दात् द्रव्यगुणकर्माण्येव बोद्धव्यानि भवन्तीति निर्देशो विद्यते। तत्र यः अर्थशब्दस्य प्रयोगो, दरीदृश्यते स च पदार्थस्यैव बोधक इति। यथोक्तम् - "अर्थ इति द्रव्यगुणकर्मसु"[६] अत्र शङ्करमिश्रः ब्रवीति "तेषु त्रिषु वैशेषिकाणामर्थ इति परिभाषा"[७] "त्रयाणामर्थशब्दाभिधेयत्वञ्च" इति प्रशस्तपादाचार्यैरुच्यते उक्तग्रन्थस्य तात्पर्यं केचन दार्शनिकाः वदन्ति यत् वैशेषिकनये त्रयः एव पदार्थाः सूत्रकारेण स्वीकृताः, कालान्तरे "कालक्रमेण जगतः परिवर्तमाना" इति कालिदासस्योक्तिं स्वीकृत्य त्रिषु पदार्थेषु सामान्यविशेषसमवायपदार्थानां संयोजनं कृत्वा "द्रव्यगुणकर्म-सामान्यविशेषसमवायाः इति षट्पदार्थाः सन्तीति व्याख्याकाराः प्रत्यपादयन्।[८] वाराणसीतः वैशेषिकसूत्रस्य प्रकाशनमभवत्। चौखम्बाविद्याभवन वाराणसीतः वैशेषिकसूत्रस्य यत्प्रकाशनमभवत्। उभयोः संस्करणे "धर्मविशेषप्रसूताद्रव्यगुणकर्मसामान्यविशेष-समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्"[९] इति प्रथमाध्यायस्य प्रथमाह्निकस्य चतुर्थं सूत्रं विद्यते। ततः प्रतिभाति यत् सूत्रकारेण षड्पदार्थाः स्वीकृता इति। परन्तु वैशेषिकसूत्रस्य अज्ञातकर्तृवृत्तिसहितस्य मिथिलाविद्यापीठसंस्करणे उक्तसूत्रं नोपलभ्यत इति अतः वाराणसीसंस्करणे यदुक्तसूत्रं प्राप्यते तत्प्रक्षिप्तमिति पाठः। अत्र राधाकृष्णन्[१०] प्रभृतिदार्शनिकानामपि सम्मतिर्विद्यते। "द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः। तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव" इति प्रशस्तपादाचार्यग्रन्थेन प्रतीयते यत् षट्पदार्थाः वैशेषिकदर्शने भवन्तीत्यस्य मतस्य संस्थापको

Vijnana Bharati

विस्तारकश्च प्रशस्तपादाचार्यएव वर्तत इति। तदनन्तरं प्रक्षिप्तोक्तसूत्रस्य संयोजनं वैशेषिकदर्शनेऽभवत्। उक्तमतस्य समर्थने डॉ. विजल्वान् उक्तवान् यत् "षट्पदार्थेष्वपि एकः विकासक्रमो वर्तते। प्रथमचरणे द्रव्याणां ज्ञानमभूत्, पुनः द्रव्येषु भेदं दृष्ट्वा द्रव्येन्तर्निहितगुणानां ज्ञानं बभूव। द्रव्याणामवस्थापरिवर्तनेन कर्मपदार्थस्य अवधारणा अभूदिति। विकासस्य द्वितीयसोपाने कालान्तरे अनेकवस्तूनां सामान्यात् सामान्यपदार्थस्य परमाणूनां भिन्नत्वाद् तद् भेदको विशेषस्य अयुतसिद्धानां अपृथक्त्वाद् तद्भेदको समवायस्य च अवधारणा अभवत्। तथा च कालक्रमेण षड्पदार्थाः वैशेषिकनये अभूवन् इति। परन्तु अस्मिन् मते न किमपि प्रमाणमुपलभ्यते। दरभंगाविद्यापीठतः प्रकाशिते संस्करणेऽपि अधोलिखितविषयाणां निरूपणमुपलभ्यते-

प्रथमाध्याये समवेताशेषपदार्थकथनम्।[11] द्वितीयाध्याये द्रव्यनिरूपणम्।[12] तृतीयाध्याये आत्मान्तः करणलक्षणम्। चतुर्थाध्याये शरीरतदुपयोगिविवेचनम्।पञ्चमाध्याये कर्मप्रतिपादनम्। षष्ठाध्याये श्रौतधर्मविवेचनम्। सप्तमाध्याये गुणसमवाययोः प्रतिपादनम्। अष्टमाध्याये ज्ञानोत्पत्तिः तन्निदानादिनिरुरूपणम्। नवमाध्याये बुद्धिविशेषप्रतिपादनम्। दशमाध्याये आत्मगुणभेदप्रतिपादनञ्चेति विषयाणां निरूपणं दरीदृश्यते। उक्तविषयाणां पर्यालोचनेन प्रतिभाति यत् वैशेषिकसूत्रकारेणैव षट्पदार्थाः स्वीकृताः। पूर्वोक्तत्रिपदार्थ-वादिमतन्तु चिन्त्यमसमीचीनञ्च। यद्यपि द्रव्यादीनां पदार्थानां बहूनि लक्षणानि शास्त्रेषु निर्दिष्टानि वा प्रतिपादितानि सन्ति। तथापि विस्तरभयादेकैकं लक्षणमुच्यते। समवायिकारणत्वं द्रव्यस्य लक्षणम्।[13] नित्यवृत्तिनित्यावृत्तिसत्ताव्याप्यजातिमत्त्वं गुणस्य लक्षणम्।[14] नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वम् कर्मणः लक्षणम्।[15] नित्यत्वे सति अनेकसमवेतत्त्वं सामान्यस्य लक्षणम्।[16] निरवयवद्रव्यवृत्तित्वे सति व्यावर्तकत्वम् विशेषस्य लक्षणम्। यथा अयं घटः तद्घटभिन्नः एतदीयकपालभेदात् । एवं अयं त्र्यणुकः तत्त्र्यणुकभिन्नः, द्व्यणुकभेदात्। इदं द्वयणुकं तद्द्व्यणुकभिन्नं परमाणुभेदात्। एवम् अयं परमाणुः तत्परमाणुभिन्नः विशेषादिति अत एव विश्वनाथभट्टाचार्योऽपि वदति "घटादीनां द्वयणुकपर्यन्तानां तत्तदवयवभेदात् परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव।"[17] नित्यसम्बन्धत्वं समवायस्य लक्षणम् । नवद्रव्येषु पृथिवीजलतेजोवायूनामेव परमाणवः भवन्ति। अत एव एतेषामेव कार्यद्रव्यरूपेणोत्पत्तिर्भवति।

परमाणुवस्तुनि आधुनिकवैज्ञानिकानां कृते अत्यन्तोपयोगिनः सन्ति। तानाधारीकृत्य साम्प्रतं वैज्ञानिकैः जगद्विध्वंसकारिणः विस्फोटादिकस्य निर्माणं कृतम्। तस्मिन् विषये आधुनिकतमं प्रदर्श्य तदनन्तरं प्राच्यवैशेषिकमतं प्रदर्शयिष्ये। ईश्वीयारम्भकालात् त्रिसहस्रवर्षपूर्वं महर्षिणा कणादेन वैशेषिकसूत्रस्य रचना कृता। तत्र "सदकारणवन्नित्यमि"त्यनेन[18] परमाणुवादस्य स्थापना तैः विहिता। परमाणुतः कार्यद्रव्यस्योत्पत्तिर्भवति इति कणादमतमेव स्वीकृत्य यूनानीप्रसिद्धदार्शनिकः डिमाक्रिटसः उक्तवान् यत् "सम्पूर्णभौतिक-पदार्थाः परमाणुतः एव निर्मिताः सन्ति।" वैशेषिकशास्त्ररीत्या परमाणवः नित्याः सन्ति। तेषां विखण्डनम् न भवितुमर्हति नित्यत्वात्। परन्तु द्वयधिकैकोनविंशतितमे ईशवीये अनुसन्धानेन प्रतीच्यवैज्ञानिकाः अकथयन् यत् यूरेनियमतत्त्वं, थोरियमतत्त्वञ्च रेडियो ऐक्टिव वर्तेते। अस्यां क्रियायां पूर्वोक्ततत्त्वयोः परमाणवः स्वतः रूपान्तरणं कुर्वन्ति। उक्तनवीनतथ्यस्य ज्ञानेन प्रतिभाति यत् परमाणवोऽपि अनित्याः सन्ति। वैज्ञानिकाः वदन्ति यत् परमाणूनां भागद्वयं विद्यते आन्तरिकं बाह्यञ्च। आन्तरिकं नाभिकपदवाच्यं भवति। नाभिके प्रोटानतत्त्वानामुपस्थितत्वात् धनावेशो भवति। बाह्यभागे इलेक्ट्रानसंज्ञकः पदार्थो विद्यते अत्र ऋणावेशो जायते। इलेक्ट्रानपदार्थाः नाभिकपदार्थं परितः प्रदक्षिणां तथैव कुर्वन्ति यथा सूर्यं परितः पृथिव्यादिनवग्रहाः प्रदक्षिणां कुर्वन्ति।

परमाणूनामतिसूक्ष्मत्वात् वैज्ञानिकाः अपि वदन्ति यत् तेषां प्रत्यक्षं न कर्तुं शक्यते। दशाधिकैकोनविंशतितमे ईश्वीये वैज्ञानिकाः परमाणुमवलम्ब्य अनुसन्धानं कृतवन्तः। तस्मात् ज्ञातं यत् परमाणुः सावयवो विद्यते।

तत्रातिसूक्ष्मनाभिको विद्यते यं परितः इलेक्ट्रानसंज्ञकाः पदार्थाः परिभ्रमन्ति। नाभिकेऽपि न्यूट्रानप्रोट्रानसंज्ञके द्वे तत्त्वे विद्येते। उक्तानुसन्धानेन वैज्ञानिकाः अवदन् यत् जगतः सृष्टिः प्रोटॉनन्यूट्रान -इलेक्ट्रानतत्त्वानां सम्मिश्रणेन वा संयोगेन जायत इति। उक्तमन्तं वैशेषिकशास्त्रदृष्ट्या न साधु। यदि परमाणुः सावयवः तस्य अवयवोऽपि सावयवः एवं रीत्या अनवस्थादोषः आपतति। वैशेषिकस्वीकृत-परमाणुस्तु निरवयवो विद्यते। तथाच अणुषु यत् परमः अणुः वर्तते तदपेक्षया कश्च सूक्ष्माणुः न विद्यते अथ च सः निरवयवो विद्यते तदेव वैशेषिकपदार्थस्वीकृतपरमाणुः इति। अत एव वैशेषिकदार्शनिकाः वदन्ति यत् 'सूर्यस्य आलोकः गवाक्षमार्गेण तमसि कक्षे यदि आगच्छति तत्र यत्सूक्ष्मं रजः दृश्यते तस्य षष्टितमो भागः यदि उच्यते तर्हि समीचीनं भविष्यति। यतोहि जालान्तर्गतदृश्यमानस्य रजसः षष्ठभागरूपस्य परमाणोः विखण्डनमभवत् । परन्तु जालान्तगर्तस्य सूक्ष्मकणस्य षष्टितमभागस्य इदानीं यावत् विखण्डनं नाभूत् तदेव न्यायवैशेषिकदर्शनस्वीकृतपरमाणुः विद्यते। पाश्चात्य

Vijnana Bharati

वैज्ञानिका: गुरुत्वाकर्षण-सिद्धान्तस्यान्वेषणं एकोनविंशतिशताब्द्यामकुर्वन्। परन्तु अस्य सिद्धान्तस्य सर्वप्रथमं प्रतिपादनमीश्वीयत: त्रिसहस्रपूर्वमेव कणादेन महर्षिणा कृतम्। वैशेषिकसूत्रस्य पञ्चमाध्याये सूत्रं विद्यते –

संयोगाभावे गुरुत्वात् पतनम्[२०]

उक्तसूत्रे संयोगपदार्थ: प्रतिबन्धक: तथाच प्रतिबन्धकाभावे गुरुत्वकर्षणशक्त्या वस्तुन: अध: संयोगफलिका क्रिया जायते तत्र गुरुत्वगुण: पतने असमवायिकारणं भवति। गुरुत्ववति फलादौ प्रतिबन्धक: संयोग: विहङ्गमादौ तु विधारक-प्रयत्न: पतन प्रतिबन्धक:। काण्डादौ क्षिप्ते संस्कार एव पतनप्रतिबन्धक:। तथा च सिद्धं गुरुत्वादेव वस्तुनामधोपतनं भवति। वैज्ञानिकस्वीकृत-वैशेषिकदर्शने अन्येऽपि अनेके आधुनिकसिद्धान्ता: सन्ति। विस्तरभयादत्रैव विरम्यत इति।

***सन्दर्भ :***


१. वैशेषिकदर्शनम् – अ. १, आ. १, सू. ४, पृ.सं. १०

२. वैशेषिकदर्शनम् – अ. ९, आ. १, सू. १, पृ.सं. ३११

३. वैशेषिकदर्शनम् – अ. ९, आ. १, सू. २, पृ.सं. ३१२

४. वैशेषिकदर्शनम् – अ. ९, आ. १, सू. ४, पृ.सं. ३१३

५. वैशेषिकदर्शनम् – अ. ९, आ. १, सू. ५, पृ.सं. ३१४

६. वैशेषिकसूत्रम् – उपस्कारसहितम्, अ. ८, सू. ३, पृ.सं. ३०७

७. वैशेषिकसूत्रम् – उपस्कारसहितम्, पृ.सं. ३०७

८. वैशेषिकसूत्रम् – उपस्कारसहितम्, पृ.सं. ३०७

९. वैशेषिकसूत्रम् – उपस्कारसहितम्, अ. १, आ. १, सू. ४, पृ.सं. १०

१०. भारतीयदर्शन, राधाकृष्णन, भाग २, पृ० १८६

११. वैशेषिकसूत्रम् अ. १, आ १

१२. वैशेषिकसूत्रम् अ. १, आ १

१३. वैशेषिकसूत्रम् – उपस्कारसहितम्, पृ.सं. ३३

१४. वैशेषिकसूत्रम् – उपस्कारसहितम्, पृ.सं. ३५

१५. वैशेषिकसूत्रम् – उपस्कारसहितम्, पृ.सं. ३६

१६. न्यायसिद्धान्तमुक्तावली, पृ.सं. ४४

१७. न्यायसिद्धान्तमुक्तावली, पृ.सं. ५१

१८. वैशेषिकसूत्रम् – उपस्कारसहितम्, अ. ४, आ. १, सू. ४, पृ.सं. १७

१९. वैशेषिकसूत्रम् – उपस्कारसहितम्, अ. ४, आ. १, सू. ४, पृ.सं. १७

२०. वैशेषिकसूत्रम् – पृ.सं. १९७


Vijnana Bharati